National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2016; 1(4): 57-59
© 2016 NJHSR
www.sanskritarticle.com

**आचार्यः के गणपतिभट्टः**
अद्वैतवेदान्तविभागः,
राष्ट्रियसंस्कृतविद्यापीठम्,
तिरुपतिः

**Correspondence:**
**आचार्यः के गणपतिभट्टः**
अद्वैतवेदान्तविभागः,
राष्ट्रियसंस्कृतविद्यापीठम्,
तिरुपतिः

# "गूढार्थदीपिकानुसारेण तत्त्वमसिमहावाक्यार्थः"

**आचार्यः के गणपतिभट्टः**

**भूमिका –**

सुविदितमेव एतद् समेषाम् आस्तिकविदुषां यत् समग्रवेदराशिः प्रवृत्तिनिवृत्त्युभयात्मकः धर्मद्वयबोधनपरः इति। तदुक्तं भगवत्पादशङ्कराचार्यैः - द्विविधो हि वेदोक्तो धर्मः प्रवृत्तिलक्षणो निवृत्तिलक्षणः चः इति।[1] संहितासु प्रवृत्तिरूपधर्मः बोध्यते। उपनिषत्सु परं निवृत्तिरूपधर्मः प्रतिपाद्यते। तत्रापि जातमात्रस्य मनुष्यस्य धर्मार्थकाम-मोक्षाख्यचतुर्विधपुरुषार्थेषु प्रवृत्तिः दृश्यते। तेषु च मोक्ष एव परमपुरुषार्थः। मोक्षे परमत्वञ्च पुनरावृत्तिरहितनित्यत्वरूपं "न च पुनरावर्तते"[2] इति श्रुतेः। तादृशमोक्षप्राप्तये सर्वेऽपि जनाः साधनं समीहते। मोक्षसाधनञ्च जीवब्रह्मैक्यज्ञानमेव। तच्च उपनिषत्सु प्रतिपाद्यते। परमपुरुषार्थ-साधनीभूतं ज्ञानम्। ब्रह्मज्ञानस्य मोक्षं प्रति हेतुत्वं उपनिषत्सु चोद्घुष्यते – "तं त्वौपनिषदं पुरुषं पृच्छामि"[3] इति श्रुतेः।

**उपक्रमः –**

एतादृशस्य औपनिषदस्य आत्मविज्ञानस्य प्राप्तये श्रवणरूपविचारः विधित्सितः "आत्मा वाऽरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः"[4] इति। तादृशात्मविचारे कः अधिकारी इति जिज्ञासायां साधनचतुष्टयसम्पन्नः अधिकारी इति भाष्यकृदाशयः। साधनचतुष्टयञ्च नित्यानित्य-वस्तुविवेकः, इहामुत्रफलभोगविरागः, शमदमादिषङ्कसम्पत्तिः मुमुक्षत्वञ्चेति।

एतादृशसाधनचतुष्टयसम्पन्नः केनचित् ब्रह्मनिष्ठेन गुरुणा "तत्त्वमसि" इत्युपदिष्टे सति तत् श्रुत्वा श्रवणमनननिदिध्यासनरूपब्रह्मसाक्षात्कारस्य अन्तरङ्गसाधनानि अनुष्ठाय कदाचित् "अहं ब्रह्मास्मि" इति जीवब्रहैक्यम् अनुभूयात्। जीवब्रौक्यज्ञानं वाक्यादेव भवति इति विवरणानुसारिणः। मनसैव इति वाचस्पतिमिश्राः।

शास्त्राचार्योपदेशशमदमादिसंस्कृतं मनः आत्मदर्शने करणमिति गीताभाष्यवचनाद्। तदेवं सर्वे वेदान्ताः जीवब्रह्मक्य-प्रतिपादनपराः। उपनिषदाम् अत्यन्तं दुरूहत्वात् मन्दमतयः नाधिगन्तुं प्रभवन्ति इत्यतः श्रुत्यर्थविशदीकरणाय स्मृतिः तथा सूत्राणि च प्रवृत्तानि। एवञ्च श्रुतिः स्मृतिः सूत्रमिति प्रस्थानत्रयं प्रथितम्। श्रुतिर्नाम उपनिषदः स्मृतिर्नाम भगवद्गीता सूत्रं तु महर्षि बादरायणप्रणीतं ब्रह्मसूत्रम्। एवं त्रिषु अपि प्रस्थानेषु जीवब्रहैक्यमेव तत्त्वमसि महावाक्यप्रतिपाद्यं विशदीक्रियते।

तत्त्वमसिमहावाक्ये तत् त्वम् असि इति पदत्रयमस्ति। वाक्यार्थज्ञानञ्च पदार्थज्ञानाधीनम् इत्यतः पूर्वं तत्त्वमोः पदयोः अर्थज्ञानम् आवश्यकम्। त्वमर्थः तत्पदार्थश्च उपनिषत्सु नितरां विस्तृतरूपेण प्रतिपादितः। श्रुतिपन्थानम् अनुसरन्ती भगवद्गीता च जीवब्रह्मक्यमेव प्रतिपादयति। तत् प्रतिपादनाय च पदार्थशोधनम् आवश्यकम्। तत्र गीतायामपि तत् पदार्थशोधनं त्वं पदार्थशोधनम् ऐक्यप्रतिपादनम् इत्येतद् त्रयमपि समुपलभ्यते। तदाविष्करणाय गीतायाः जीवब्रहैक्यप्रतिपादनरीतेः आविष्करणाय च

मधुसूदनसरस्वतीविरचितगूढार्थदीपिकेति गीताभाष्यव्याख्यानमाश्रित्य निर्मीयमाणे संशोधनात्मके प्रबन्धेऽस्मिन् यथामति प्रयासः क्रियते। कुरुक्षेत्रे समारङ्गणमागत्य युद्धसन्नद्धोऽर्जुनः भीष्मद्रोणादीन् दृष्ट्वा व्याहतचेताः युद्धादुपरराम। तदा स्वकर्तव्याद्विमुखमर्जुनं प्रति भगवान् श्रीकृष्णः उपदिदेश। तदुपदेशसार एव भगवता वेदव्यासेन सप्तभिः श्लोकशतैः संगृहीतः। अत्राष्टादशाध्यायाः सन्ति।

प्रस्थानत्रय्यां स्मृतिप्रस्थानत्वेन परिगणितगीतायाः उपरि बहुभिः आचार्यैः भाष्यटीकादिग्रन्थाः विरचिताः। तेषु ग्रन्थेषु अद्वैतमतानुसारिभगवत्पादशङ्कराचार्यकृतभाष्यं नितरां सर्वोत्कृष्टस्थानं भजते। तत्र श्रीमधुसूदनसरस्वतीस्वामिभिः प्रणीता गूढार्थदीपिका व्याख्या विद्वन्मनोरञ्जनी सुप्रतिष्ठिताऽवलोक्यते। भगवत्पादशङ्करमतावलम्बिनी गूढार्थदीपिका टीकेयं विद्वत्सु मधुसूदनी इति नाम्ना प्रथिता वर्तते। यद्यपि भगवत्पादशङ्कराचार्यैः अशोच्यानन्वशोचस्त्वम् इति द्वितीयाध्यायस्य एकादशश्लोकादारभ्य भगवद्गीतायाः व्याख्याम् अकार्षीत्। परन्तु मधुसूदनसरस्वतीस्वामिभिः प्रथमश्लोकादेव भगवद्गीतायाः व्याख्यानं कृतम्।

तथा गीतायाः व्याख्यानात् पूर्वं गूढार्थदीपिकायाम् प्रारम्भे ४६ श्लोकैः गीतायाः प्रतिपाद्यविषयं साररूपेण संगृहीतम्। तत्र उपनिषत्साररूपा गीता औपनिषदुक्तं जीवब्रौक्य-प्रतिपादकं तत्त्वमसिमहावाक्यमेव प्रतिपादयति इत्यपि उक्तम्। वेदाः यथा कर्मोपासनाज्ञानरूप-त्रिकाण्डात्मकाः भवन्ति तथैव अष्टादशाध्याय्याः गीताया एकैकं षट्ङ्कम् अपि एकैकं काण्डं द्योतयति। तत्र प्रथमं कर्मकाण्डं त्वंपदार्थ-विशुद्धात्मनः जीवस्य स्वरूपं प्रतिपादयति। द्वितीयं उपासनाकाण्डं भक्तियोगः तत्पदार्थस्य ब्रह्मणः स्वरूपं प्रतिपादयति। चरमं ज्ञानकाण्डं तत् त्वंपदार्थयोः जीवब्रह्मणोरैक्यं प्रतिपादयति। इत्थं श्रीमद्भगवद्गीता तत्त्वमसिमहावाक्यं प्रतिपादयति।

गूढार्थदीपिकायाः कर्तारः भवन्ति भगवतः परमभक्ताः मधुसूदनसरस्वती-स्वामिपादाः। अद्वैतसिद्धिकाराः अद्वैतवादिनः श्रीमधुसूदनसरस्वतीश्रीचरणाः षोडश-शताब्द्यां बङ्गप्रदेशस्य फरिदपुरमण्डलान्तर्गते उसनियापरगणयाः कोटालीपाडा नामके जन्म लब्धवन्तः। मधुसूदनसरस्वतीश्रीचरणैः अद्वैतसिद्धान्तान् दृढयितुं बहवः ग्रन्थाः विरचिताः। तेषु अन्यतमा श्रीमद्भगवद्गीतायाः गूढार्थदीपिका व्याख्या। अत्र तैः ज्ञानभक्तियोगयोः अत्यद्भुतः समन्वयः प्रादर्शि।

तथा च वेदान्ते प्रायः उपक्रमोपसंहारभ्यां अर्थक्येन अद्वैतवेदान्ते महावाक्यानां अखण्डब्रह्मविषयकं तात्पर्यं निरूप्यते। भगवत्पादशङ्कराचार्योऽपि कथयति वाक्यैकवाक्यत्वम् "उपक्रमोपसंहाराभ्यां वाक्यैकत्वमवगम्यते" इति। एतैः तात्पर्यलिङ्गः सर्वेषां उपनिषद् वाक्यानां अद्वितीये ब्रह्मणि एव तात्पर्यं इत्यर्थः दृढीक्रियते। तथा च "औपनिषदं ब्रह्म" "सर्वे वेदा यत्पदमामनन्ति"[5] इति श्रुतिः। "वेदैश्च सर्वैरहमेव वेद्यः"[6] "ज्ञाने परिसमाप्ते"[7] इति स्मृतिः। "जन्माद्यस्य यत:" "तत्तु समन्वयात्"[8] "आत्मेति तूपगच्छन्ति ग्राहयन्ति च"[9] इत्यादीनि सूत्राणि प्रमाणम्।

**महावाक्येषु तात्पर्यलिङ्गानां समन्वयप्रदर्शनम् –**

तात्पर्यलिङ्गानां स्वरूपविभागप्राबल्यदौर्बल्यादिकमधिकृत्य यथामति निरूप्य सम्प्रति तेषां लिङ्गानाम् उदाहरणं प्रस्तूयते। अत्र केवलं श्रुतिशिखाभूतां प्रसिद्धानां चतुर्णां महावाक्यानां तात्पर्यलिङ्गानि प्रदर्श्यन्ते।

**छान्दोग्योपनिषदि तात्पर्यलिङ्गानां समन्वयप्रदर्शनम् –**

प्रप्रथमम् उपदेशात्मकत्वात् प्रसिद्धतमस्य सामवेदस्य छान्दोग्योपनिषदान्तर्गतस्य तत्त्वमसि महावाक्यस्य तात्पर्यलिङ्गानि प्रदर्श्यन्ते। तथा हि छान्दोग्ये षष्ठाध्याये -"सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्"[10] इत्युपक्रमवाक्येन सजातीयविजातीय-स्वगतभेदरहितं निरुपाधिकं सच्चिन्मात्रस्वरूपम् अखण्डं ब्रह्म विवक्षितम्।

उपसंहारेऽपि "ऐतदात्म्यमिदं सर्वं तत् सत्यं स आत्मा" इति इदं नामरूपात्मकं चराचरं जगत् अबाधितसत्ब्रह्मस्वरूपं इत्यर्थकेन उपसंहारवाक्येन उपक्रमोपसंहारयोः अखण्डे ब्रह्मणि तात्पर्यं सिध्यति। यथा आर्थी पुरुषः स्वाभिलाषितमर्थं नानविधवाक्यैः पुनः पुनः प्रकटीकुयदिवं विविधयुक्तिमद्वचनैः प्रत्यग्ब्रह्मैक्यं" स च

"एषोऽणिमैतादात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि" इत नवकृत्वोऽभ्यासः सद्रूपब्रह्मविषयकः। तेन नित्यत्व चेतनत्व सर्वात्मकत्व हेतुभिः ब्रह्मण औत्कर्षं प्रदर्शितं भवति।

नीरूपस्य ब्रह्मणः प्रत्यक्षादि प्रमाणान्तागोचरत्वात् अपूर्वता। अद्वितीयं प्रत्यगभिन्नं ब्रह्म वेदान्तेतरप्रमाणागम्यमिति स्वप्रकाशकत्वेन नित्यापरोक्षमिति चार्थः "श्रद्धत्स्व सोम्य" "आचार्यवान् पुरुषो वेद" इति गुरुवेदान्तवाक्यश्रद्धामात्र-समधिगमत्वबोधकवचनैगम्यत इति अपूर्वता। "उत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातम्"[11] इति एकविज्ञानेन सर्वविज्ञानं फलम्।

वेदान्तसारे इदं प्रशंसारूपत्वात् अर्थवादरूपं लिङ्गमिति वर्णीतम्। तदानीम् "आचार्यवान् पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्ष्ये"[12] इति प्रयोजनसूचकं लिङ्गम्। अस्मिन् प्रकरणे सृष्टिस्थितिप्रलयनियमप्रवेशरूपाः पञ्चविधाः अर्थवादाः उपलभ्यन्ते। ते यथा - "तदैक्षत बहुस्यां प्रजायेयेति तत्तेजोऽसृजत"[13] इति सृष्टिविषयः। "सन्मूलाः सोम्येमाः प्रजाः सदायतनाः सत्प्रतिष्ठाः"[14]

इत्यनेन स्थिति-नियन्त्रणे अभिधीयते। "तेजः परस्यां देवतायाम्"[15] इत्यनेन प्रलयः कथितः। "इमास्तिस्रो देवताः अनेनजीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि" इत्यादिकं प्रवेशविषयम् इत्येवं पञ्चविधैः अर्थवादैः जगज्जन्मस्थितिलयहेतुभूतं ब्रह्म प्रतिपादित-मिति सुव्यक्तं भवति। उपपत्तिः "यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्यात् वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यं"[16] "तेजसा सोम्य शुङ्गेन सन्मूलमिच्छ सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठा"[17] इत्यादिवचोभिः कार्यं मिथ्या कारणमात्रं सत्यमिति प्रतिपाद्यते।

यतो हि कारणं विना कार्यं न भवति। कार्येण कारणं ज्ञातव्यमिति सूचयत् ब्रह्मणः सत्यत्वं नित्यत्वं च निरूपयति। तदतिरिक्तस्य मिथ्यात्वम् अनृतत्वं च साधयति। तथा सति षड्खिध-तात्पर्यलिङ्गोपेतः छान्दोग्योपनिदः षष्ठाध्यायः अण्डाद्वितीय-प्रत्यगभिन्नब्रह्मप्रतिपादकमिति निश्चप्रचम्। छान्दोग्योपनिषदः प्रतिपाद्यविषयम् अपरिच्छिन्नं निष्प्रपञ्चब्रह्मात्मैक्यं केवलेन पदत्रयात्मकेन "तत्त्वमसि" वाक्येन प्रबोधनात् इदमेकं महावाक्यम् अखण्डशुद्धब्रह्मचैतन्यप्रतिपादकम्। इत्येवंविधया शैल्या गूढार्थ-दीपिकायाः भावमनुसृत्य तत्त्वमसिवाक्यार्थः संक्षिप्ततया निरूपितः।

**सन्दर्भग्रन्थ :-**

1 श्रीमद्भगवद्गीताशाङ्करभाष्ये उपोद्घातभाष्ये।

2 छा.उ-8.15.1

3 ब्र.उ-3.9.26

4 ब्र.उ-2.4.5

5 कठोपनिषद्-1.2.15

6 भगवद्गीता-15.15

7 ब्रह्मसूत्रम्-1.1.2

8 ब्रह्मसूत्रम्-1.1.4

9 ब्रह्मसूत्रम्-4.1.23

10 छा.उ-6.2.1

11 छा.उ-6.1.3

12 छा.उ-16.14.2

13 छा.उ-6.2.3

14 छा.उ-6.8.4

15 छा.उ-6.8.6

16 छा.उ-.6.1.4

17 छा.उ-6.8.6